# श्री महालक्ष्मी चतुर्विंशति नामावलिः

श्री वेंकटेशमहिषीमहलक्ष्मी प्रीत्यर्थं
श्री वेंकटेशमहिषीमहालक्ष्मी चतुर्विंशति नामभिः
श्री वेंकटेशमहिषी महालक्ष्म्यर्चनं करिष्ये ॥

अस्य श्रीमहालक्ष्मी चतुर्विंशतिनाम मंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । श्रीमहालक्ष्मीर्देवता । श्रीवेंकटेशमहिषीमहालक्ष्मीप्रीत्यर्थे जपे विनियोगः ॥

**। ध्यानं ।**

ईशानां जगतोस्य वेंकटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षस्थलनित्यवासरसिकां तत्क्षांतिसंवर्धिनीम् ।
पद्मालंकृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्वलां भगवतीं वंदे जगन्मातरम् ॥

ओं श्रियै नमः ।
ओं लोकधात्र्यै नमः ।
ओं ब्रह्ममात्रे नमः ।
ओं पद्मनेत्रायै नमः ।
ओं पद्ममुख्यै नमः ।
ओं प्रसन्नमुखपद्मायै नमः ।
ओं पद्मकांत्यै नमः ।
ओं बिल्ववनस्थायै नमः ।
ओं विष्णुपत्न्यै नमः ।

© 2022 Vedam Nadam

ओं विचित्रक्षौमधारिण्यै नमः ।

ओं पृथुश्रोण्यै नमः ।

ओं पक्वबिल्वफ़लापीनतुंगस्थन्यै नमः ।

ओं सुरक्तपद्मपत्राभकरपादतलायै नमः ।

ओं शुभायै नमः ।

ओं सरत्नांगदकेयूरकाङ्चीनूपुरशोभितायै नमः ।

ओं यक्षकर्दमसंलिप्तसर्वांगायै नमः ।

ओं कटकोज्ज्वलायै नमः ।

ओं मांगल्याभरणैश्चित्रैर्मुक्ताहारैर्विभूषितायै नमः ।

ओं ताटंकैरवतंसैश्च शोभमानमुखांबुजायै नमः ।

ओं पद्महस्तायै नमः ।

ओं हरिवल्लभायै नमः ।

ओं ऋग्यजुस्सामरूपायै नमः ।

ओं विद्यायै नमः ।

ओं अब्धिजायै नमः ।

एवं चतुर्विंशतिनामभिः बिल्वपत्रैर्लक्ष्म्यर्चनं कुर्यात् ।
सर्वाभीष्टसिद्धिर्भवति ॥

॥ इति श्री महालक्ष्मी चतुर्विंशति नामावलि संपूर्णम् ॥

© 2022 Vedam Nadam